THE HINDU TEMPLE SOCIETY OF NORTH AMERICA

Šri Mahã Vallabha Ganapati Devasthãnam

# *Šãnti Mantras*

## Prayer for the World Peace

śāntipāṭhaḥ - 12 ghōṣāśāntiḥ

*šãnti mantras* are given below in *sanskrit* script. Priests will chant these *mantras* and all the devotees are expected to listen to it, in a meditative mood to invoke peace and calmness in body, mind & spirit and for purification.

## शान्तिपाठः - १२ घोषाशान्तिः

ॐ शं नो॒ वातः॑ पवतां मात॒रिश्वा॒ शं न॑स्तपतु॒ सूर्यः॑ । अहा॑नि॒ शं भ॑वन्तु
न॒श्शꣳरात्रि॒ः प्रति॑ धीयताम् । शमु॒षानो॒ व्यु॑च्छतु॒ शमा॑दि॒त्य उदे॑तु नः ।
शि॒वा न॒श्शन्त॑माभव सुमृडी॒का सर॑स्वति ।

मात॒ व्यो॑म स॒न्दृशि॑ । इडा॑यै॒वास्त्व॑सि वास्तु॒ मद्वास्तु॒मन्तो॑ भूयास्म॒ मा
वास्तो-श्छिथ्स्मह्यवा॒स्तुस्स भू॑या॒द्योऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः ।
प्र॒ति॒ष्ठाऽसि॑ प्रति॒ष्ठाव॑न्तो भूयास्म॒मा प्र॑ति॒ष्ठाया-श्छिथ्स्मह्यप्रति॒ष्ठस्स
भू॑या॒द्योऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः । आवा॑तवाहि भेष॒जं विवा॑तवाहि॒
यद्रपः॑ । त्वꣳ हि वि॒श्वभे॑षजो दे॒वानां॑ दू॒त ईय॑से । द्वावि॒मौ वातौ॑ वात॒
आसिन्धो॒राप॑रा॒वतः॑ ॥

दक्षं᳚ मे अ॒न्य आ॒वातु॒ परा॒ऽन्योवा॑तु॒ यद्रपः॑ । यद॒दोवा॑तते गृ॒हे॑ऽमृत॑स्य
नि॒धिर्हि॒तः । ततो॑ नो देहि जी॒वसे॒ ततो॑ नो धेहि भेष॒जम् । ततो॑ नो॒ मह॒
आव॑ह॒ वात॒ आवा॑तु भेष॒जम् । श॒म्भूर्म॑यो॒भूर्नो॑ हृ॒देप्रण॒ आयूꣳषि तारिषत् ।
इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॒ प्रप॑द्ये॒ सगु॒स्साश्वः॑ । स॒ह यन्मे॒ अस्ति॒ तेन॑ । भूः
प्रप॑द्ये॒ भुवः॒ प्रप॑द्ये॒ सुवः॒ प्रप॑द्ये॒ भूर्भुव॒स्सुवः॒ प्रप॑द्ये वा॒युं प्रप॒द्येऽनार्तां दे॒वता॒ं


45-57 Bowne Street, Flushing, New York 11355-2202 • Tel: (718)460-8484 • Fax: (718)461-8055

http://nyganeshtemple.org • email: hts@nyganeshtemple.org

प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्मप्रपद्य ॐ प्रपद्ये ।
अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्तिमान्तया
स्वस्त्या स्वस्तिमानसानि । प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मां
हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां
मयीन्द्रं इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

द्युभि-रक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो
वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उतद्यौः । कयानश्चित्र आभुवदूती
सदावृधस्सखा । कयाशचिष्ठया वृता । कस्त्वा सत्यो मदानां मँहिष्ठो
मथ्सदन्धसः । दृढा चिदारुजे वसु । अभीषुणस्सखीनामविता जरितॄणां ।
शतंभवास्यूतिभिः । वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयोनाधमानाः।
अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मन्निधयेव बद्धान् ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ ईशाना
वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रान आप
ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आपो
हिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो
रसस्तस्य भाजयते ह नः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य
क्षयाय जिन्वथ ।

आपो जनयथा च नः । पृथिवी शान्ता साऽग्निना शान्ता सामे शान्ता शुचँ
शमयतु । अन्तरिक्षँशान्तं तद्वायुना शान्तं तन्मे शान्तँ शुचँ शमयतु ।
द्यौश्शान्ता साऽदित्येन शान्ता सा मे शान्ता शुचँ शमयतु । पृथिवी
शान्तिरन्तरिक्षँ शान्ति-द्यौ-श्शान्तिर्दिश-श्शान्ति-रवान्तरदिशा-श्शान्ति
-रग्नि-श्शान्ति-र्वायु-श्शान्ति-रादित्य-श्शान्ति-श्चन्द्रमा-श्शान्ति-र्नक्षत्राणि-
शान्ति-राप-श्शान्ति-रोषधय-श्शान्ति-र्वनस्पतय-श्शान्ति-र्गौ-श्शान्ति-
रजा-शान्ति-रश्व-श्शान्तिः पुरुष-श्शान्ति-ब्रह्म-श्शान्ति-ब्राह्मण-श्शान्ति-

श्शान्तिं-रेव शान्ति-श्शान्तिं-र्मे अस्तु शान्तिः । तयाह शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुंष्पदे च शान्तिं करोमि शान्तिंर्मे अस्तु शान्तिः ॥

एह श्रीश्च ह्रीश्च धृतिंश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिंष्ठन्त-मनूत्तिंष्ठन्तु मामाँ श्रीश्च ह्रीश्च धृतिंश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः । उदायुंषा स्वायुषोदोषंधीनाँ रसेनोत्पर्जन्यंस्य शुष्मेणोदंस्थाममृताँ अनुं । तच्चक्षुंर्देवहितं पुरस्ताच्छुक्रमुच्चरंत् । पश्येम शरदंश्शतं जीवेम शरदंश्शतं नन्दाम शरदंश्शतं मोदाम शरदंश्शतं भवाम शरदंश्शतँ शृणवाम शरदंश्शतं प्रब्रवाम शरदंश्शतमजीतास्स्याम शरदंश्शतं ज्योक्च सूर्यं दृशे ।

य उदंगान्महतोऽर्णवाद्विभ्राजंमानस्सरिरस्य मध्यात्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु ॥ ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपंनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीँ सदेवाँ यदहँ वेद तदहं धारयाणि मामद्वेदोऽधि विस्रंसत् । मेधामनीषे माविंशताँ समीचीं भूतस्य भव्यस्यावरुध्यै सर्वमायुंरयाणि सर्वमायुंरयाणि । आभिर्गीर्भिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिं गोत्रा रुजासिं भूयिष्ठभाजो अधं ते स्याम । ब्रह्म प्रावांदिष्म तन्नो मा हासीत् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥